A 507

॥ ॥अथबौधायनीपुनराधेयप्रारंभः॥ ॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

॥श्रीगणेशायनमः॥अथपुनराधेयं॥यस्याधानकालादारभ्यसंवत्सरस
मान्नेरवीक्पुत्रभ्रातृबंधूनांपशूनांधनस्यवाहानिर्यजमानस्यमाहारो
गोवाजायतेअरणीसमारूढोवाग्निर्नश्येत्॥अन्याभिवाअन्यनुगत्या
दीनिनिमित्तानिभवंतिसपुनराधेयंकुर्यात्॥पुनराधेयस्यकालः॥आ
षाढ्याःपौर्णमास्याःपुरस्तादमावास्याप्रतिपद्द्वितीयासुयस्मिन्दिनेआ
हवनीयाधानकालेअर्धोदितेसूर्येउदितेवापुनर्वसुयोगस्तत्रकुर्यात्॥ १
अत्रपुनर्वसुयोगाभावेउदगयनआपूर्यमाणपक्षेपुनर्वसुयुक्तेकस्मिं

श्चिद्दिनेवाकुर्यात्॥तत्रसंभाराः॥रथोवासोनड्वान्तिस्रोदर्भमय्योरज्ज
आधानोक्ताश्चसंभाराः॥पुनर्वसुयुक्तात्पूर्वेद्युर्याःपुरस्तादित्यादिऋ
द्धिकामोन्नीन्युनराधास्ये॥इतित्रिरुपांशुत्रिरुच्चैः॥रुत्विग्वरणमर्हणं
चकृत्वारण्योरग्नीन्समारोप्यदेवयजनंगत्वाविहारंकल्पयित्वामथित्वा
ग्नीन्विहृत्यगार्हपत्येस्मार्त्तवराज्यंसंस्कृत्यस्रुचिचतुर्गृहीतंगृहीत्वा
मनस्त्वाहवनीयेजुहोति॥ततोयजमानअग्नुद्वासनेष्ट्यायक्ष्ये॥इ
तिसंकल्प्य॥उद्वासनेष्टिसंबंधिहविः॥व्रीहिमयःपुरोडाश्द्रव्यंपंचप्र

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

अग्नयेवैश्वानरायऽपांशुअनुब्रूहीत्युच्चैः॥२

बौ॰पु॰य २ या

याजाअग्नीषोमावाज्यभागौवैश्वानरोद्वादशकपालःपुरोडाशःदेवा आज्यपाइत्यादिप्रधानमुपांशु॥पंचदशसामिधेन्यः॥अग्नयेवैश्वानरा येदं॥अग्नेवैश्वानरस्याहंदेवयज्यैभुविःपूतोमेध्योभूयासं॥स्विष्टकृदा दिअन्वाहार्यमासाद्यशतमानंहिरण्यंददातिअग्नयेहिरण्यं॥अनुयाजा दिब्राह्मणतर्पणांतंसमानं॥ ॥तदानीमेवाद्भिरग्नीन्समभ्युक्ष्य॥पुनःसं स्कृतेपूर्वस्मिन्नेवाग्यगारेतक्षणसंस्कृतानिपूर्वपात्राणिकृत्वाध्वर्युर्गा र्हपत्यायतनमुदंति॥उद्वुन्यमानमु॰साता॥शन्नोदेवी॰तुनः॥एवमन्वा

हार्यपच ॰नाहवनीययोः॥ततोवैश्वानरस्यरूपमित्यादिसन्नपार्थिवा न्सन्नवानस्यत्यान्संभारानाहरति॥चित्रियामुंजकुलायअरणीआह रति॥पुनरपिप्रत्येकंसंभरति॥यंत्वांस॰नेषित्विद्वान्॥गोपित्रयज्ञोवैक ल्पिकः॥ततोवपनंदर्शपूर्णमासवद्दंपतीअश्नीयातां॥अथाधिदृक्षस्रू र्यइत्यादि॥अग्नयेसुवीर्यधायु॰नायुस्वाहा॥तस्मिन्नेवाज्यौजयानभ्याता नान्वाहृभृतोमात्यहोमान्हुत्वाप्राजापत्यांजुहोतिनुत्यांजुहोति॥अं गारान्सतेवाशरावेवावद्धाति॥आयुषेवो॰मि॥उपोत्तिष्ठति॥आयु

मीमा०मा विंशतु ॥ उदायंति ॥ गार्हपत्यायतनेऽग्निं प्रतिष्ठाप्य ॥ उपसमा
धायपरिस्तीर्योत्तरतः पात्राणिसादयतीत्यादिसमानमाविहृताग्नयोमा
कश्चनांतरेणसंचारीदित्यंतंसमानं ॥ ॥ अथापररात्रेउत्थाय ॥ ॥ वाचं
यमोभविष्यसीत्यादिगार्हपत्याधानांतंसमानंदर्भमयीरज्जुज्वलयित्वा
तयागार्हपत्यमादधाति ॥ भूर्भुवोद्यौर्मःशिरस्तदयमग्निःसंप्रियःपशुभि
र्भुवत् ॥ छुर्दिस्तोकायुतनयायशंय ॥ भूमिर्भूम्नाद्यौर्वरिणानरिक्षंमहि ३
त्वा ॥ उपस्थेतेदेव्यदितेऽग्निमन्नादमन्नाद्यायादधे ॥ आयंगौः पृश्निरक्रमी

दसदन्मातरंपुनः ॥ पितरंचप्रयन्त्सुवः ॥ त्रिरंशद्धामविराजतिवाक्पतंगा
यंश्रिश्रिये ॥ प्रत्यस्यवह्युभिः ॥ अस्यप्राणादपानत्यंतश्चरतिरोचना ॥
व्यख्यन्महिषःसुवः ॥ भृगूणामित्यादिसमानं ॥ पूर्ववज्ज्वलयित्वाअ
न्वाहार्यपचनमादधातिपूर्ववज्ज्वलयित्वा ॥ इमाऽइमा०दीदिहिजातवे
दः ॥ दक्षिणाग्निमुपतिष्ठते ॥ पूर्ववज्ज्वलयित्वा ॥ उपयमनीःकल्पयती
त्यादिरध्वमुद्धर न्वाह ॥ ब्रह्मन्छंदा ंसि० ॥ ओजसेबलाय० ॥ प्राची
मनु०प्रथमंभागंगच्छति ॥ विक्रमस्व० ॥ द्वितीयंभागं ॥ अन्वग्निरुषसा० ॥

तृतीयंभागं॥अग्निमन्यहस्तेदत्वाअश्वादीनामन्यतमस्यदक्षिणेनपूर्वपा
देनसंभारणामुत्तरदेशमाक्रमय्याश्वंप्रदक्षिणमावृत्याङ्गिरभ्युस्थोदं
चमुत्सृजति॥सएषोध्वर्योर्भवति॥अन्यमश्वंब्रह्मणे॥अध्वर्युःप्रदक्षि
णमावृत्यप्रत्यङ्मुखस्तिष्ठन्अग्निंसंभारेषुअश्वपदेप्रतिष्ठापयति॥यदि
दं॰स्तुनुवेयोनः॥घृणंत्वामृतआद॰गुह्यं॥ब्रह्मछंदा॰सि॰॥निहितम
ग्निंस्पृष्ट्वाजपति॥आहवनीयत्वेनावधारयतिवा॥भूर्भुवःसुवर्द्यौश्चक्षु ४
स्त॰वत्॥यत्तेशुक॰न्तेब्रह्मणा॥यत्वाक्रुद्धःपरोवपमन्युनायदवर्त्या॥सु

कल्पमग्नेतत्तवपुनस्त्वोद्दीपयामसि॥यत्तेमन्युपरोप्तस्यपृथिवीमनुर
ध्वसे॥आदित्याविश्वेतद्देवावसवश्चसमाभरन्॥मनोज्योतिर्जुष॰ तो
दयंतो॥भृगूणांत्वा॰गायत्रेणछंदसा॥स्वयातनुव॰॥रजतंपूर्ववत्प्र
राय॥अग्निमुपतिष्ठते॥आनृशे॰नशे॥आज्यंसंस्कृत्यपंचनानावृक्षी
ओ याआदधाति॥आश्वत्थींडुंबरीपालाशींशमींवैकंकतींच॥समिध्यमा
नः॥घृतप्रतीको॰॥त्वामग्नेसमि॰॥त्वामग्नेपुष्करा॰॥घृतप्रतीकंवक्र॰॥
एवमुभयोरपियजमानान्वारब्धः॥गार्हपत्यस्यपश्चात्सपत्नीकस्तिष्ठन्नुपतिष्ठ

ते॥येतेअग्नेशिवेतनुवौ॰स्वाहेत्थे॥एवमुभयोः॥एवंदेष्यमनसाध्याय
न्त्स्यग्निंघोरास्तनूरनुदिशति॥यास्तेअग्नेघोरास्तनुवः॰वृयंहिष्मः।त्वि
क्कुस्त्रीहि॰हिष्मः॥जघनेनगार्हपत्यंनिषद्यराजकमेरुपनिषत्ते॥नर्य
प्रजांमे॰प्रतिष्ठितां॥गार्हपत्यं॥अथर्वपितुंमे॰पितुंकृणु॥अन्वाहार्य
पचनं॥शंस्यंपशून्मे॰फाआशुगाः॥आहवनीयं॥सप्रथसुभांमे॰रुपा
सतां॥सभ्यं॥अहेबुध्नियमंत्रंमे॰तासुतां॥आवसथ्यं॥अध्वर्युराज्यस्था ५
र्तवत्संस्कृत्यचतुर्गृहीतंगृहीत्वाहवनीयेसमिधमाधायपरिषिच्यपरि

श्रितेऽपरिश्रितेवातिष्ठन्नासीनोवापूर्णाहुतिंजुहोति॥सुप्रतेअग्ने॰घृ
तेनूस्वाहा॥अग्नयेसप्तवतऽइदं॥तेनैवाज्येनस्रुवेणकूष्मांडंहुत्वोपस्थायव
रदानोतं॥यजमानः॥आग्नेय्याऽस्थायस्येऽतिसंकल्प्य॥अग्नेयो॰गो॥आ
ग्नेयःपंचकपालःपुरोडाशः॥देवाआज्यपाऽत्यादि॥अग्निर्बुद्धिमान्नि
रिंद्रमानित्याज्यभागौ॥पंचदशसामिधेन्यः॥प्रधानमुपांशु॥अग्नये
बुद्धिमतेनुब्रूहि॥अग्निंबुद्धिमंतंयज॥अग्नयेबुद्धिमतऽइदं॥अग्नयइंद्रु
मतेनुब्रूहि॥अग्निमिंद्रुमंतंयज॥अग्नयइंद्रुमतऽइदं॥अध्वर्युराज्यस्थाल्या

स्रुवेणजुहोति॥पुनर्ऊर्जानिवर्त्तस्वपुनरग्नऽइषायुषा॥पुनर्नःपाहिविश्वतस्वाहा॥अग्नयइदं॥अथप्रधाने॥अग्नयेअनुब्रूहि॥अग्नियज॥अग्नयइदं॥अग्नेरहंदेवयु॰न्नादोभूयासं॥अ॰र्युःपुरोडाशंकृतिंकृत्वाआज्याकृतिंजुहोति॥सुहरण्यानिवर्त्तुस्वाग्नेपिन्वस्वधारया॥विश्वश्चस्निग्याविश्वतस्परिस्वाहा॥अग्नयइदं॥ततःस्विष्टकृताप्रचर्य॥अन्वाहार्यमासाद्य॥प्रजापतेर्भागो॰॥ऋत्विजःअयंवओदनःअग्नीरिदंतउपबर्हणं॥ब्रह्मन्नयंतेश्वःहोतॄँषतेनद्वान्॥मिथुनौगावौवासोगावश्त्यश्वायंतेधेनुः॥अध्वर्योए१ ६

धेयिकींदक्षिणांदत्वापुनराधेयिकींदक्षिणांददाति॥रथंवासोनड्वाहमिति॥देवस्यत्वा॰रेविदक्षिणेवैश्वानरायुरथं॥वैश्वानरःप्रत्नथानाकमारुहत्॥दिवःपृष्ठंभंदमानःसुमन्मभिः॥सपूर्वेव्यजनयज्जंतवेधनं॥समानमज्मापरियातिजागृविः॥राजात्वावरुणोनयतुदेविदक्षिणेवैश्वानरायुथं॥तेनामृतत्वमित्यादि॥सोमायुवासः॥रुद्रायुगो॥सूक्तवाकेयथादैवतमूहः॥तदानीमेवान्वाधानादिअग्नीवारुणेष्टिः॥अग्नीवरुणैएकादशकपालःपुरोडाशः॥पंचदशसामिधेन्यः॥अग्नीवरुणा

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

बौ·पु·य ७ भ्यामनुब्रूहि॥अग्नीवरुणौयज॥अग्नीवरुणाभ्यामिदं॥अग्नीवरुणयो
रहंदेवयज्ययोरन्नहाभूयासं॥अन्वाहार्यमासाद्यअनड्वाहंददाति।ब्रा
ह्मणतर्पणांतंसमानं॥ ॥पुनराधेयानंतरंसंवत्सरात्पूर्वंपुत्रमरणादि
निमित्तेपुनःपुनराधेयंकुर्यात्॥तस्मिन्नग्नीयाधानेपंचकपालस्याग्नेय
स्यस्विष्टकृदवदानानंतरंतिस्रःस्रुवाहुतीर्जुहोति॥लोकःसलोकःसुलो
कस्तेनआदित्याआज्यंजुषाणाविंयंतुस्वाहा॥आदित्येभ्यइदं॥विवस्वा ७
ंअदितिर्देवजनित्रीस्तेनआदित्याआज्यंजुषाणाविंयंतुस्वाहा॥आदित्ये
२केतुःसकेतःसुकेतुस्तेनआदित्याआज्यंजुषाणाविंयंतुस्वाहा॥आदित्येभ्यइदं॥२
णा

भ्यइदं॥[redacted]ब्राह्मणतर्पणांतंसमानं॥अथसर्वाग्निनाशेस
मारूढारणीनाशेअग्नीनाधास्येविच्छिन्नसंधानार्थमितिसंकल्प्यऋत्वि
ग्वरणादिगोपित्वयज्ञवर्जंअविकृतमग्न्याधेयंकुर्यात्॥ ॥इतिबौधाय
नीयपुनराधेयंसमाप्तं॥ ॥ ७ ॥ ॥७॥ ॥श्रीः॥
कालांतरमाहसत्याषाढआपस्तंबश्च॥वर्षासुशरदिवाधते
रोहिणीपुनर्वस्वनूराधाश्वेति॥ ॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

बौ·पु·य
८

॥ ॥इतिबौधायनीपुनराधेयंसमाप्तं:॥ ॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY